किञ्चिद्दूषाग्निदा कण्डूकुष्ठकोठक्रमीन् हरेत्॥
अतितीक्ष्णा विशेषेण तद्वत् कृष्णापि राजिका”
तत्तैलगुणाः।
“दीपनं सार्षपं तैलं कटुपाकरसं लघु।
लेखनं स्पर्शवीर्य्योष्णं तीक्ष्णं पित्तासृग्दूषकम्॥
कफमेदोऽनिलार्शोघ्नं शिरःकर्णामयापहम्।
कण्डूकोठक्रिमिश्वित्रकुष्ठदुष्टव्रणप्रणुत्॥
तद्वत् राजिकयोस्तैलं विशेषान्मूत्रकृच्छ्रकृत्॥”
राजिकयोः कृष्ण राइ। आरक्त राइ।
तयोः॥*॥ तच्छाकगुणाः।
“कटुकं सार्षपं शाकं बहुमूत्रमलं गुरुः।
अम्लपाकं विदाहि स्यादुष्णं रूक्षं त्रिदोषकृत्॥
सक्षारं लवणं तीक्ष्णं स्वादुशाकेषु निन्दितम्।
तीक्ष्णोष्णं सार्षपं नालं वातघ्नं व्रणापहम्।
कण्डूक्रिमिहरं दद्रुकुष्ठघ्नं रुचिकारकम्॥”
इति भावप्रकाशः॥*॥
स्थावरविषभेदः। इति हेमचन्द्रः॥ षड्लिख्या-
परिमाणम्। यथा,—
“जालान्तरगते भानौ यच्चाणुर्दृश्यते रजः।
तैश्चतुर्भिर्भवेल्लिख्या लिख्याषड्भिश्च सर्षपः॥”
इति शब्दचन्द्रिका॥
सर्षपतैलं, क्ली, (सर्षपोद्भवं तैलम्।) सर्षपजात-
स्नेहः। यथा,—
“सर्षपतैलं तिक्तं कटुकं वातकफविकारघ्नम्।
पित्तास्रदोषदं क्रिमिकुष्ठघ्नं तिलजवच्चक्षुष्यम्॥”
इति राजनिर्घण्टः॥
सर्षपी, स्त्री, (सृ गतौ + अपः षुगागमश्च। ततो
ङीष्।) खञ्जनिका। इति त्रिकाण्डशेषः॥
(पिड़काविशेषः। यथा, सुश्रुते। २। १३।
“गौरसर्षपसंस्थाना तत्प्रमाणा तु सर्षपी॥”)
सलं, क्ली, (सरतीति। सृ गतौ + अच्। रस्य
लः। सल गतौ + अच् वा।) जलम्। इत्यमर-
टीकायां भरतः॥
सलिलं, क्ली, (सलति गच्छतीति। सल गतौ +
“सलिकल्यनीति।” उणा॰ १। ५५। इति
इलच्।) जलम्। इत्यमरः। १।१०।३॥ तत्र
विण्मूत्रत्यागनिषेधो यथा, मनुः।
‘न मूत्रं पथि कुर्वीत न भस्मनि न गोव्रजे।
न फालकृष्टे न जले न चित्यां न च पर्व्वते॥
न जीर्णदेवायतने न वल्मीके कदाचन।
न ससत्त्वेषु गर्त्तेषु न गच्छन्नापि संस्थितः॥
न नदीतीरमासाद्य न च पर्व्वतमस्तके।
वाय्वग्निविप्रानादित्यमपः पश्यंस्तथैव च।
न कदाचन कुर्व्वीत विण्मूत्रस्य विसर्ज्जनम्॥”
इत्याह्निकतत्त्वम्॥
अपि च।
“मूत्रश्लेष्मपुरीषाणि यैरुत्सृष्टानि वारिणि।
“ते पात्यन्ते च विण्मूत्रे दुर्गन्धे पूयपूरिते॥”
इति वामनपुराणे कर्म्मविपाको नाम १२
अध्यायः॥*॥ अथ सलिलपरीक्षा। पितामहः।
“तोयस्याथ प्रवक्ष्यामि विधिं धर्म्मं सनातनम्
मण्डलं पुष्पधूपाभ्यां कारयेत् सुविचक्षणः॥
शरान् संपूजयेन्नत्या वैणवञ्च धनुस्तथा॥”
तत्र प्रथमतो वरुणं पूजयेत्। यथा नारदः।
“गन्धमाल्यैः सुरभिभिर्मधुक्षीरघृतादिभिः।
वरुणाय प्रकुर्व्वीत पूजामादौ समाहितः॥”
ततो धर्म्मावाहनादिसकलदेवतापूजाहोमसम-
न्त्रकप्रतिज्ञापत्रशिरोनिवेशान्तं कर्म्म कुर्य्यात्।
कात्यायनः।
“शरांस्त्वनायसाग्रांस्तु प्रकुर्व्वीत विशुद्धये।
वेणुकाष्ठमयाश्चैव क्षेप्ता च सुदृढं क्षिपेत्॥”
पितामहः।
“क्षेप्ता च क्षत्रियः कार्य्यः तद्वृत्तिर्ब्राह्मणोऽथवा
अक्रूरहृदयः शान्तः सोपवासस्तथा शुचिः॥
इषूंश्च प्रक्षिपेद्धीमान् मारुते वाति वा भृशम्।
विषमे भूप्रदेशे च वृक्षस्थाणुसमाकुले॥”
नारदः।
“क्रूरं धनुः सप्तशतं मध्यमं षट्शतं मतम्।
मन्दं पञ्चशतं प्रोक्तमेष ज्ञेयो धनुर्व्विधिः॥”
अङ्गुलीनां सप्ताधिकं शतं यस्य धनुषः परिमाणं
तत् सप्तशतं एवं षट्शतादिकम्। पिता-
महः।
“मध्यमेन तु चापेन प्रक्षिपेत्तु शरत्रयम्।
हस्तानाञ्च शते सार्द्धे लक्ष्यं कृत्वा विचक्षणः॥
तेषाञ्च प्रेषितानान्तु शराणां शास्त्रदेशनात्।
मध्यमस्तु शरो ग्राह्यः पुरुषेण बलीयसा॥
शराणां पतनं ग्राह्यं सर्पणं परिवर्ज्जयेत्।
सर्पन् सर्पन् शरो याति दूराद्दूरतरं यतः॥”
पतनं ग्राह्यमिति शरपतनस्थानपर्य्यन्तं गच्छे-
दित्यर्थः। तेन प्रसरणपक्षेऽपि पतनस्थानकशर-
ग्रहणम्। ततश्च प्रथमतः पुरुषान्तरेण तत्स्थाने
शर आनेतव्यः। नारदः।
“नदीषु नातिवेगासु तड़ागेषु सरःसु च।
ह्रदेषु स्थिरतोयेषु कुर्य्यात् पुंसां निमज्जनम्॥”
नातिवेगासु स्थितिविरोधिवेगशून्यासु। विष्णुः।
पङ्कशैवालदुष्टग्राहमत्स्यजलौकादिवर्ज्जिते तस्य
नाभिमात्रजले मग्नस्यारागद्वेषिणः पुरुषस्यान्य-
स्योरू गृहीत्वाभिमन्त्रिताम्भः प्रविशेत्। तत्-
समकालञ्च नातिक्रूरमृदुना धनुषा पुरुषोऽपरः
शरमोक्षं कुर्य्यादिति। तस्य शोध्यस्येत्यर्थः।
अन्यथा तस्येति व्यर्थं स्यात्॥*॥ अन्यपुरुषस्य
स्तम्भधारणमाह स्मृतिः।
“उदके प्राङ्मुखस्तिष्ठेद्धर्म्मस्थूणां प्रगृह्य च॥”
प्राड्विवाककर्त्तृकजलाभिमन्त्रणमाह पिता-
महः।
“तोय त्वं प्राणिनां प्राणः सृष्टेराद्यन्तु निर्म्मितम्
शुद्धेश्च कारणं प्रोक्तं द्रव्याणां देहिनान्तथा।
अतस्त्वं दर्शयात्मानं शुभाशुभपरीक्षणे॥”*॥
शोध्यकर्त्तृकाभिमन्त्रणमाह याज्ञवल्क्यः।
“सत्येन माभिरक्षस्व वरुणेत्यभिशाप्य कम्।
नाभिमात्रोदकस्थस्य गृहीत्वोरू जलं विशेत्॥”
मा मामभिशाप्य शपथं कारयित्वा कं जलं
विशेत् निमज्जेत्। तोरणञ्च निमज्जनसमीपे
समे स्थाने शोध्यकर्णप्रमाणोच्छ्रितं कार्य्यम्।
यथा, नारदः।
“गत्वा तु तज्जलस्थानं तटे तोरणमुच्छ्रितम्।
कुर्व्वीत कर्णमात्रन्तु भूमिभागे समे शुचौ॥”
शरमोक्षे विशेषमाहतुर्नारदबृहस्पती।
“शरप्रक्षेपणस्थानाद्युवा जवसमन्वितः।
गच्छेत् परमया शक्त्या यत्रासौ मध्यमः शरः॥
मध्यमं शरमादाय पुरुषोऽन्यस्तथाविधः।
प्रत्यागच्छेत् तु वेगेन यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्ज्जलगतं सम्यक् तदा शुद्धिं विनिर्द्दिशेत्॥
अन्यथा न विशुद्धः स्यादेकाङ्गस्यापि दर्शनात्।
स्थानाद्वान्यत्र गमनाद्यस्मिन् पूर्व्वं निवेशयेत्॥”
जविनौ विशेषयति नारदः।
“पञ्चाशतो धावकानां यौ स्यातामधिकौ जवे
तौ च तत्र नियोक्तव्यौ शरानयनकर्म्मणि॥”
एकाङ्गस्य दर्शनादिति कर्णाद्यभिप्रायेण॥
“शिरोमात्रन्तु दृश्येत न कर्णौ नापि नासिके
अप्सु प्रवेशने यस्य शुद्धं तमपि निर्द्दिशेत्॥”
इति विशेषाभिधानात्॥
कात्यायनः।
“निमज्ज्योत्प्लवते यस्तु दृष्टश्चेत् प्राणिना नरः
पुनस्तत्र निमज्जेत दंशचिह्नविचारितः॥”
जलान्तर्गतमत्स्यजलौकादिना दष्टः समुत्प्लवते
यदि तदा दष्टे दृष्टे पुनर्निमज्जनीय इत्यर्थः॥*॥
पितामहः।
“गन्तुश्चापि च कर्त्तुश्च समं गमनमज्जनम्।
गच्छेत्तोरणमूलात्तु शरस्थानं जवी नरः॥
तस्मिन् गते द्वितीयोऽपि वेगादादाय शाय-
कम्।
गच्छेत्तोरणमूलन्तु यतः स पुरुषो गतः॥
आगतस्तु शरग्राही न पश्यति यदा जले।
अन्तर्ज्जलगतं सम्यक् ततः शुद्धिं विनिर्द्दिशेत्॥”
अत्र मज्जनसमकालं गमनाभिधानात् शर-
मोक्षसमकालं गमनं शूलपाण्युक्तमयुक्तम्।
मज्जनसमकालक्षिप्तं मध्यमं शरमादायेत्यपर-
मुक्तमपि प्रमाणशून्यम्। ततश्च त्रिषु शरेषु
मुक्तेषु एको वेगवान् मध्यमशरपतनस्थानं
गत्वा तमादाय तत्रैव तिष्ठति अन्यस्तु पुरुषो
वेगवान् शरमोक्षस्थाने तोरणमूले तिष्ठति
एवं स्थितयोस्तृतीयायां करतालिकायां प्राड्-
विवाकदत्तायां शोध्यो निमज्जति तत्समकाल-
मेव तोरणमूलस्थितोऽपि द्रुततरं मध्यमशर-
पतनस्थानं गच्छति शरग्राही च तस्मिन् प्राप्ते
द्रुततरं तोरणमूलं प्राप्यान्तर्ज्जलगतं यदि न
पश्यति तदा शुद्धो भवतीति वर्त्तुलार्थः॥*॥
तत्र प्रयोगः। उक्तलक्षणजलाशयनिकटे तथा
तोरणं विधाय उक्तदेशे लक्ष्यं कृत्वा तोरण-
समीपे सशरं धनुः संपूज्य जलाशये वरुण-
मावाह्य पूजयित्वा तत्तीरे धर्म्मादींश्च देवान्
हवनान्तमिष्ट्वा दक्षिणां कृत्वा शोध्यस्य शिरसि
प्रतिज्ञापत्रं बद्ध्वा प्राड्विवाको जलमभि-
मन्त्रयेत्।